ऋषयो मुनयः सिद्धास्तत्र गच्छन्ति धेनुदाः ॥
तत्र भोगानथो भुङ्क्ते ब्रह्मलोके स तिष्ठति ।
क्रीड़ित्वा सुचिरं कालं पुनर्मर्त्त्यमुपागतः ।
स भुक्त्वा विपुलान् भोगान् विष्णुलोकं स गच्छति ॥
दशपूर्व्वान् दशपरानात्मानञ्चैकविंशतिम् ।
नयति विष्णुसायुज्यं मधुधेनुप्रसादतः ॥
य इदं शृणुयाद्भक्त्या श्रावयेद्वापि मानवः ।
सर्व्वपापविनिर्म्मुक्तो विष्णुलोकं स गच्छति ॥"
इत्यादि वराहपुराणे श्वेतोपाख्याने मधुधेनुमाहात्म्यम् ॥

मधुनालिकेरकः, पुं, (मधुर्म्मधुरो नारिकेलः स्वार्थे कन् । रलयोरैक्यात् रस्य लत्वं लस्य च रत्वम् ।) मधुनारिकेलः । एरनारिकेल इति कोकणे प्रसिद्धम् । मोहानारल इति च ख्यातम् । तत्पर्य्यायः । माध्वीकफलः २ मधुफलः ३ अधितजफलः ४ माक्षिकफलः ५ मृदुफलः ६ बहुकूर्च्चः ७ दृढफलः ८ । अस्य गुणाः । मधुरत्वम् । शिशिरत्वम् । दाहतृष्णार्त्तिपित्तहारित्वम् । बलपुष्टिश्लेष्मकान्तिकारित्वम् । वीर्य्यविवर्द्धनत्वम् । रुच्यत्वञ्च । अपि च ।
"माध्वीकं नारिकेरं फलमतिमधुरं दुर्ज्जरं जन्तुकारि
स्निग्धं वातातिसारभ्रमशमनमथ ध्वंसनं वह्निदीप्तेः ।
आमश्लेष्मप्रकोपं जनयति कुरुते चारुकान्तिं बलञ्च
स्थैर्य्यं देहस्य धत्ते घनमदनकलावर्द्धनं पित्तनाशम् ॥"
इति राजनिर्घण्टः ॥

मधुनी, स्त्री, क्षुपविशेषः । माकड़ छाता इति माकड़ चाउली इति च भाषा ॥ तत्पर्य्यायः । शतमखा २ वायसोली ३ सुमङ्गला ४ । इति रत्नमाला ॥

मधुनेता, [ ऋ ] पुं, (मधु नयति पुष्पेभ्यः संग्रहातीति । णीञ् + तृच् ।) भ्रमरः । इति शब्दचन्द्रिका ॥

मधुपः, पुं, (मधु पिबतीति । पा + कः ।) भ्रमरः । इत्यमरः । २ । ५ । २९ ॥ (यथा, राजतरङ्गिण्याम् । ३ । ४०९ ।
"शम्बूरतिमाचमायन्ते देवीधामनि धैर्य्यवान् ।
धुन्वन् कराभ्यां मधुपान् धावति स्म स धीरधीः ॥"
मधु जलं पातीति । पा + कः । वारिरक्षके, त्रि । यथा, ऋग्वेदे । ५ । ३२ । ८ ।
"त्वं चिदस्य मधुपं शयानमसिन्वं वव्रं मह्याददुग्रः ।"
"मधुपं मधुनोऽम्भसः पातारं पालयितारम् ।" इति तद्भाष्ये सायनः ॥ मधुपानकर्त्तरि च, त्रि । यथा, ऋग्वेदे । १ । १८० । २ ।
"स्वसा यद्वां विश्वगूर्त्ती भराति वाजायेट्टे मधुपाविषे च ।" "हे मधुपौ मधुरस्य सोमरसस्य पातारौ ।" इति तद्भाष्ये सायनः ॥ )

मधुपर्कं, क्ली, (पृच् + घञ् । मधुना पर्कौ योगोऽत्र ।) दधिसंयुक्तमधु । तत्पर्य्यायः । मद्योदयः २ । इति हेमचन्द्रः । ३ । ४६७ ॥ अपि च ।
"मधुपर्कं दधिमधुघृतमपिहितं कांस्येनेति । अपिहितमाच्छादितम् ।" इत्येकादशीतत्त्वे-कात्यायनसूत्रम् ॥

मधुपर्कः, पुं, (पृची + घञ् । मधुना पर्कः सम्पर्को यस्य मधुना संयोजनात् तथात्वम् ।) षोड़शोपचारपूजान्तर्गतषष्ठोपचारः । तस्य प्रमाणं यथा,—
"दधि सर्पिर्ज्जलं क्षौद्रं सितैताभिस्तु पञ्चभिः ।
प्रोच्यते मधुपर्कस्तु सर्व्वदेवौघतुष्टये ॥
जलन्तु सर्व्वतः स्वल्पं सिता दधि घृतं समम् ।
सर्व्वेषामधिकं क्षौद्रं मधुपर्के प्रयोजयेत् ॥
तद्दद्यात् कांस्यपात्रेण रौक्म्येतभवेन वा ।
ज्योतिष्टोमाश्वमेधादौ पूर्त्ते चेष्टे प्रपूजने ॥
मधुपर्कः प्रतिष्ठोऽयं सर्व्वदेवौघतुष्टिदः ।
धर्म्मार्थकाममोक्षाणां साधकः परिकीर्त्तितः ॥
मधुपर्कः सौख्यभोग्यतुष्टिपुष्टिप्रदायकः ॥"
इति कालिकापुराणे ६७ अध्यायः ॥
अपि च ।
"आज्यं दधिमधुमिश्रं मधुपर्कं विदुर्ब्बुधाः ॥"
इति तन्त्रसारः ॥
तद्दाने मुद्रा यथा,—
"संयुक्तानामिकाङ्गुष्ठा तिस्रोऽन्याः संप्रसारिताः ।
मधुपर्के च सा मुद्रा विद्वद्भिः परिकीर्त्तिता ॥"
इति हरिभक्तिविलासः ॥

मधुपर्णिका, स्त्री, (मध्विव हितं पर्णमस्याः । ततः स्वार्थे कन् टाप् । अत इत्वञ्च ।) गम्भारीवृक्षः । (अस्याः पर्य्यायो यथा,—
"गम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका ।
काश्मीरी काश्मरी हीरा काश्मर्य्यः पीतरोहिणी ॥
कृष्णवृन्ता मधुरसा महाकुसुमिकापि च ॥")
नीलीवृक्षः । इत्यमरः । २ । ४ । ३५ ॥ (अस्याः पर्य्यायो यथा,—
"नीली तु नीलिनी तूली कालदोला च नीलिका ।
रञ्जनी श्रीफली तुच्छा ग्रामीणा मधुपर्णिका ॥
क्लीतका कालकेशी च नीलपुष्पा च सा स्मृता ॥")
वराहक्रान्ता । इति शब्दचन्द्रिका ॥ गुड़ूची । सुदर्शना । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते शारीरस्थाने १० अध्याये ;
"पृश्निपर्णी बलाशिग्रुश्वदंष्ट्रा मधुपर्णिका ॥"
अस्याः पर्य्यायो यथा,—
"सुदर्शना सोमवल्ली चक्राङ्गा मधुपर्णिका ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

मधुपर्णी, स्त्री, (मधु इव हितं पर्णं यस्याः । गौरादित्वात् ङीष् ।) गुड़ूची । इत्यमरः । २ । ४ । ८४ ॥ (अस्याः पर्य्यायो रत्नमालायां यथा,
"वत्सादनी छिन्नरुहा मधुपर्ण्यमृतामरा ।
कुण्डल्यमृतवल्ली च गुड़ूची चक्रलक्षणा ॥")
गम्भारीवृक्षः । नीलीवृक्षः । इति मेदिनी । ने, १०५ ॥ मधुबीजपूरः । इति राजनिर्घण्टः ॥ ( विकङ्कतवृक्षः । तत्पर्य्यायो यथा,—
"विकङ्कतः स्वादुकण्टः स्रुग्दारु मधुपर्ण्यपि ॥"
इति वैद्यकरत्नमालायाम् ॥)

मधुपाका, स्त्री, ( पाकेन मधुर्म्मधुरा । राजदन्तादित्वात् पूर्व्वनिपातः । टाप् ।) वड़भुजा । इति राजनिर्घण्टः ॥

मधुपायी, [न्] पुं, (मधु पिबतीति । पा + णिनिः । ततः "आतोयुक् चिण्कृतोः ।" ७ । ३ । ३३ । इति युक् ।) भ्रमरः । इत्यमरटीकायां रामाश्रमः ॥ मधुपानकर्त्तरि, त्रि ॥

मधुपालिका, स्त्री, ( मधु पालयतीति । पालि + ण्वुल् । टाप् । अत इत्वम् ।) गम्भारी । इति शब्दमाला ॥ ( विवरणोऽस्या गम्भारीशब्दे द्रष्टव्यः ॥ )

मधुपीलुः, पुं, (मधुर्म्मधुरः पीलुः ।) महापीलुः । इति राजनिर्घण्टः ॥

मधुपुरी, स्त्री, ( मधोस्तन्नाम्नो दैत्यस्य पुरी ।) मथुरा । इति शब्दरत्नावली ॥ ( यथा, भागवते । ७ । १४ । ३१ ।
"नैमिषं फाल्गुनं सेतुः प्रभासोऽथ कुशस्थली ।
वाराणसी मधुपुरी पम्पा बिन्दुसरस्तथा ॥")

मधुपुष्पः, पुं, ( मधुप्रचुराणि पुष्पाण्यस्य । ) मधुद्रुमः । इति रत्नमाला ॥ ( मधूकः । तत्पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । )
"मधूको गुड़पुष्पः स्यान्मधुपुष्पो मधुस्रवः ।
वानप्रस्थो मधुष्ठीलो जलजेऽत्र मधूलकः ॥")
शिरीषवृक्षः । अशोकवृक्षः । बकुलवृक्षः । इति राजनिर्घण्टः ॥

मधुपुष्पा, स्त्री, (मधुपुष्प + स्त्रियां टाप् ।) दन्तीवृक्षः । नागदन्तीवृक्षः । इति राजनिर्घण्टः ॥

मधुप्रियः, पुं, ( मधु मद्यं प्रियमस्य । ) बलरामः । इति त्रिकाण्डशेषः ॥ भूमिजम्बुः । यथा,—
"नादेयी स्त्री नागरङ्गस्त्वक्सुगन्धो मधुप्रियः ॥"
इति जटाधरः ॥ ( मद्यप्रिये, त्रि ॥ )

मधुफलः, पुं, ( मधु मधुरं फलमस्य । यद्वा, मधु मद्यं फलाद् यस्य । ) मधुनारिकेलः । इति राजनिर्घण्टः ॥ विकङ्कतवृक्षः । इति शब्दचन्द्रिका ॥ ( मधुरफलविशिष्टे, त्रि ॥ )

मधुफलिका, स्त्री, ( मधु मधुरं फलं यस्याः । मधुफल + संज्ञायां कन् । टाप् । अत इत्वञ्च ।) मधुखर्ज्जूरिका । इति राजनिर्घण्टः ॥ ( गुणादयोऽस्या मधुखर्ज्जूरिकाशब्दे ज्ञातव्याः ॥ )

मधुबहुला, स्त्री, ( मधुना मधौ वा बहुला । ) वासन्तीलता । इति राजनिर्घण्टः ॥

मधुभित्, [ द् ] पुं, ( मधुं तन्नामानं दैत्यं भिनत्ति नाशयतीति । भिद् + क्विप् । तुगागमश्च । ) विष्णुः । इति शब्दरत्नावली ॥ ( यथा, भागवते । ४ । २९ । ४० ।